गीता अनुगीता द्वितीयोऽध्यायः

रसातियुमन्नं वा दिवा स्वप्नं निषेवते ।
अपक्वानागते काले स्वयं दोषान्प्रकोपयन् ॥ १२ ॥

गीता अनुगीता चतुर्थोऽध्यायः

यथा हि पुरुषः स्वप्ने दृष्ट्वा पश्यत्यसाविति ।
तथारूपमिवात्मानं साधु युः प्रपश्यति ॥ २० ॥

गीता अष्टावक्र गीता दशमोऽध्यायः

स्वप्नेन्द्रजालवत् पश्य दिनानि त्रीणि पंच वा ।
मित्रक्षेत्रधनागारदारदायादिसंपदः ॥ २ ॥

गीता अष्टावक्र गीता सप्तदशोऽध्यायः

मनःप्रकाशसंमोहस्वप्नजाड्यविवर्जितः ।

दशां कामपि संप्राप्तो भवेद् गलितमानसः ॥ २० ॥

गीता अष्टावक्र गीता अष्टादशोऽध्यायः

अष्टावक्र उवाच ॥

यस्य बोधोदये तावत्स्वप्नवद् भवति भ्रमः ।

तस्मै सुखैकरूपाय नमः शान्ताय तेजसे ॥ १ ॥

सुप्तोऽपि न सुषुप्तौ च स्वप्नेऽपि शयितो न च ।

जागरेऽपि न जागर्ति धीरस्तृप्तः पदे पदे ॥ ९४ ॥

गीता अष्टावक्र गीता एकोनविंशोऽध्यायः

क्व स्वप्नः क्व सुषुप्तिर्वा क्व च जागरणं तथा ।

क्व तुरियं भयं वापि स्वमहिम्नि स्थितस्य मे ॥ ५ ॥

गीता अवधूत गीता तृतीयोऽध्यायः

निष्कम्पकम्पनिधनं न विकल्पकल्पं

स्वप्नप्रबोधनिधनं न हिताहितं हि ।
निःसारसारनिधनं न चराचरं हि
ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ १६ ॥

गीता अवधूत गीता चतुर्थोऽध्यायः

स्वप्नः प्रबोधो न च योगमुद्रा
नं दिवा वापि न मे कदाचित् ।
अतुर्यतुर्यं च कथं वदामि
स्वरूपनिर्वाणमनामयोऽहम् ॥ १७ ॥

गीता अवधूत गीता पञ्चमोध्यायः

इह देहविदेहविहीन इति
ननु स्वप्नसुषुप्तिविहीनपरम् ।
अभिधानविधानविहीनपरं
किमु रोदिषि मानसि सर्वसमम् ॥ २५ ॥

गीता गुरुगीता प्रथमोऽध्यायः

येनेदं दर्शितं तत्त्वं चित्तचैत्यादिकं तथा ।
जाग्रत्स्वप्नसुषुप्त्यादि तस्मै श्रीगुरवे नमः ॥ ६९ ॥

गीता गुरुगीता द्वितीयोऽध्यायः

प्रसिद्धं साधयेत्कार्यं नवग्रहभयापहम् ।
दुःस्वप्ननाशनं चैव सुस्वप्नफलदायकम् ॥ ११८ ॥

गीता श्रीरामगीता

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते
स्वप्नादिभेदेन गुणत्रयात्मनः ।
अन्योन्यतोऽस्मिन्व्यभिचारितो मृषा
नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

गीता उद्धवगीता द्वितीयोऽध्यायः

अविद्यमानः अपि अवभाति हि द्वयोः

ध्यातुः धिया स्वप्नमनोरथौ यथा ।
तत् कर्मसङ्कल्पविकल्पकं मनः
बुधः निरुन्ध्यात् अभयं ततः स्यात् ॥ ३८ ॥

गीता उद्धवगीता तृतीयोऽध्यायः

पिप्पलायनः उवाच ।
स्थिति उद्भवप्रलयहेतुः अहेतुः अस्य
यत् स्वप्नजागरसुषुप्तिषु सत् बहिः च ।
देह इन्द्रियासुहृदयानि चरन्ति येन
सञ्जीवितानि तत् अवेहि परं नरेन्द्र ॥ ३५ ॥

गीता उद्धवगीता एकादशोऽध्यायः

शोकमोहौ सुखं दुःखं देहापत्तिः च मायया ।
स्वप्नः यथा आत्मनः ख्यातिः संसृतिः न तु वास्तवी ॥ २ ॥

देहस्थः अपि न देहस्थः विद्वान् स्वप्नात् यथा उत्थितः ।

अदेहस्थः अपि देहस्थः कुमतिः स्वप्नदृक् यथा ॥ ८ ॥

वैशारद्येक्षया असङ्गशितया छिन्नसंशयः ।
प्रतिबुद्धः इव स्वप्नात् नानात्वात् विनिवर्तते ॥ १३ ॥

गीता उद्धवगीता त्रयोदशोऽध्यायः

जाग्रत् स्वप्नः सुषुप्तं च गुणतः बुद्धिवृत्तयः ।
तासां विलक्षणः जीवः साक्षित्वेन विनिश्चितः ॥ २७ ॥

यावत् नानार्थधीः पुंसः न निवर्तेत युक्तिभिः ।
जागर्ति अपि स्वपन् अज्ञः स्वप्ने जागरणं यथा ॥ ३० ॥

असत्त्वात् आत्मनः अन्येषां भावानां तत् कृता भिदा ।
गतयः हेतवः च अस्य मृषा स्वप्नदृशः यथा ॥ ३१ ॥

यो जागरे बहिः अनुक्षणधर्मिणः अर्थान्

भुङ्क्ते समस्तकरणैः हृदि तत् सदृक्षान् ।

स्वप्ने सुषुप्तः उपसंहरते सः एकः

स्मृति अन्वयात् त्रिगुणवृत्तिदृक् इन्द्रिय ईशः ॥ ३२ ॥

ईक्षेत विभ्रमम् इदं मनसः विलासम्

दृष्टं विनष्टम् अतिलोलम् अलातचक्रम् ।

विज्ञानम् एकम् उरुधा इव विभाति माया

स्वप्नः त्रिधा गुणविसर्गकृतः विकल्पः ॥ ३४ ॥

गीता उद्धवगीता चतुर्दशोऽध्यायः

तस्मात् असत् अभिध्यानं यथा स्वप्नमनोरथम् ।

हित्वा मयि समाधत्स्व मनः मद्भावभावितम् ॥ २८ ॥

गीता उद्धवगीता सप्तदशोऽध्यायः

पुत्र दारा आप्त बन्धूनां सङ्गमः पान्थसङ्गमः ।
अनुदेहं वियन्ति एते स्वप्नः निद्रानुगः यथा ॥ ५३ ॥

गीता उद्धवगीता एकविंशोऽध्यायः

स्वप्न् उपमम् अमुं लोकम् असन्तं श्रवणप्रियम् ।
आशिषः हृदि सङ्कल्प्य त्यजन्ति अर्थान् यथा वणिक् ॥ ३१ ॥

गीता उद्धवगीता द्वाविंशोऽध्यायः

जन्म तु आत्मतया पुंसः सर्वभावेन भूरिद् ।
विषय स्वीकृतिं प्राहुः यथा स्वप्नमनोरथः ॥ ३९ ॥

स्वप्नं मनोरथं च इत्थं प्रानं न स्मरति असौ ।
तत्र पूर्वम् इव आत्मानम् अपूर्वं च अनुपश्यति ॥ ४० ॥

यथा मनोरथधियः विषयानुभवः मृषा ।

स्वप्नदृष्टाः च दाशार्ह तथा संसारः आत्मनः ॥ ५४ ॥

अर्थे हि अविद्यमाने अपि संसृतिः न निवर्तते ।
ध्यायतः विषयान् अस्य स्वप्ने अनर्थ आगमः यथा ॥ ५५ ॥

गीता उद्धवगीता पञ्चविंशोऽध्यायः

सत्त्वात् जगरणं विद्यात् रजसा स्वप्नम् आदिशेत् ।
प्रस्वापं तमसा जन्तोः तुरीयं त्रिषु सन्ततम् ॥ २० ॥

गीता उद्धवगीता अष्टाविंशोऽध्यायः

अर्थे हि अविद्यमाने अपि संसृतिः न निवर्तते ।
ध्यायतः विषयान् अस्य स्वप्ने अनर्थ आगमः यथा ॥ १३ ॥

गीता श्रीमद्भगवद्गीता श्रीमद्भगवद्गीता षष्ठोऽध्यायः

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।

न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

युहारविहारस्य  युचेष्टस्य कर्मसु ।
युस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

गीता        श्रीमद्भगवद्गीता    श्रीमद्भगवद्गीता    अष्टादशोऽध्यायः

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥

योग शास्त्राणि        पातञ्जलयोगसूत्राणि        प्रथमोऽध्यायः

स्वप्ननिद्राज्ञानालम्बनं वा ॥ ३८ ॥

महाभारत        आदि पर्व        द्वितीयोऽध्याय

घोषयात्रा ततः पर्व मृगस्वप्नभयं ततः ।
व्रीहि द्रौणिकमाख्यानं ततोऽनन्तरमुच्यते ॥ ४६ ॥

महाभारत आदि पर्व अष्टनवतितमोऽध्यायः

वीतशोकभयाबाधाः सुखस्वप्नविबोधनाः ।
प्रति भारत गोप्तारं समपद्यन्त भूमिपाः ॥ ७ ॥

महाभारत सभापर्व द्विषष्टितमोऽध्यायः

स्वप्ने न तानि पश्यन्ति जाग्रतो वा युधिष्ठिर ।
कितवा यानि दीव्यन्तः प्रलपन्त्युत्कटा इव ॥ १९ ॥

महाभारत सभापर्व अष्टषष्टितमोऽध्यायः

स्वप्ने यथैतद्धि धनं जितं स्यात्
तदेवं मन्ये यस्य दीव्यत्यनीशः ।
गान्धारि पुत्रस्य वचो निशम्य
धर्मादस्मात्कुरवो मापयात ॥ १९ ॥

महाभारत वनपर्व षष्टितमोऽध्यायः

किं नु स्वप्नो मया दृष्टः कोऽयं विधिरिहाभवत्।
क्व नु ते तापसाः सर्वे क्व तदाश्रममण्डलम्॥ ९३॥

महाभारत वनपर्व पञ्चपञ्चाशदधिकशततमोऽध्यायः

ततः स्वेदः क्लमस्तन्द्री ग्लानिश्च भजते नरान्।
प्राणिभिः सततं स्वप्नो ह्यभीक्ष्णं च निषेव्यते॥ ३२॥

महाभारत वनपर्व पञ्चसप्तत्यधिकशततमोऽध्यायः

ते तु तत्सर्वमखिलमाख्यायास्मै यथातथम्।
नापश्यंस्तमृषिं तत्र गतासुं ते समागताः।
अन्वेषमाणाः सव्रीडाः स्वप्नवद्गतमानसाः॥ १२॥

महाभारत वनपर्व षण्णवत्यधिकशततमोऽध्यायः

अविद्या बहुलो मूढः स्वप्नशीलो विचेतनः।
दुर्दृशीकस्तमो ध्वस्तः सक्रोधस्तामसोऽलसः॥ ५॥

महाभारत वनपर्व पञ्चत्रिंशदधिकद्विशततमोऽध्यायः

गतायामथ तस्यां तु राजा दुर्योधनस्तदा ।

स्वप्नभूतमिदं सर्वमचिन्तयत भारत ।

विजेष्यामि रणे पाण्डूनिति तस्याभवन्मतिः ॥ २९ ॥

महाभारत वनपर्व एकोनचत्वारिंशदधिकद्विशततमोऽध्यायः

वैशम्पायन उवाच

ततः शयानं कौन्तेयं रात्रौ द्वैतवने मृगाः ।

स्वप्नान्ते दर्शयामासुर्बाष्पकण्ठा युधिष्ठिरम् ॥ २ ॥

उो रात्रौ मृगैरस्मि स्वप्नान्ते हतशेषितैः ।

तनु भूताः स्म भद्रं ते दया नः क्रियताम् इति ॥ ११ ॥

महाभारत वनपर्व एकोनषष्ट्यधिकद्विशततमोऽध्यायः

स्वप्ना हि सुमहाघोरा दृष्टा मेऽनिष्ट दर्शनाः ।
विनाशायास्य दुर्बुद्धेः पौलस्त्य कुलघातिनः ॥ ६१ ॥

स्पर्धते सर्वदेवैर्यः कालोपहतचेतनः ।
मया विनाशलिङ्गानि स्वप्ने दृष्टानि तस्य वै ॥ ६३ ॥

महाभारत वनपर्व द्विषष्ट्यधिकद्विशततमोऽध्यायः

सागरस्तु ततः स्वप्ने दर्शयामास राघवम् ।
देवो नदनदी भर्ता श्रीमान्यादोगणैर्वृतः ॥ ३३ ॥

महाभारत वनपर्व षट्सप्तत्यधिकद्विशततमोऽध्यायः

तद्यदि त्वं विजानासि किं तद्ब्रूहि सुमध्यमे ।
स्वप्नो मे यदि वा दृष्टो यदि वा सत्यमेव तत् ॥ ७० ॥

महाभारत वनपर्व एकोनाशीत्यधिकद्विशततमोऽध्यायः

स्वप्नान्ते निशि राजेन्द्र दर्शयामास रश्मिवान्।
कृपया परयाविष्टः पुत्रस्नेहाच्च भारत॥ ८॥

महाभारत वनपर्व एकाशीत्यधिकद्विशततमोऽध्यायः

वैशम्पायन उवाच
एवमुक्त्वा सहस्रांशुः सहसान्तरधीयत।
ततः सूर्याय जप्यान्ते कर्णः स्वप्नं न्यवेदयत्॥ १७॥

महाभारत वनपर्व सप्ताशीत्यधिकद्विशततमोऽध्यायः

को नु स्वप्नस्तया दृष्टो या त्वामादित्यवर्चसम्।
दिव्यवर्म समायुं दिव्यकुण्डलभूषितम्॥ १८॥

महाभारत उद्योगपर्व एकोनचत्वारिंशोऽध्यायः

न स्वप्नेन जयेन्निद्रां न कामेन स्त्रियं जयेत्।
नेन्धनेन जयेदग्निं न पानेन सुरां जयेत्॥ ६६॥

महाभारत    उद्योगपर्व    त्रिसप्ततितमोऽध्यायः

अहो पार्थ निमित्तानि विपरीतानि पश्यसि।
स्वप्नान्ते जागरान्ते च तस्मात्प्रशममिच्छसि॥ १६॥

महाभारत    उद्योगपर्व    एकचत्वारिंशदधिकशततमोऽध्यायः

स्वप्ना हि बहवो घोरा दृश्यन्ते मधुसूदन।
निमित्तानि च घोराणि तथोत्पाताः सुदारुणाः॥ ५॥

सहस्रपादं प्रासादं स्वप्नान्ते स्म युधिष्ठिरः।
अधिरोहन्मया दृष्टः सह भ्रातृभिरच्युत॥ २७॥

तव चापि मया कृष्ण स्वप्नान्ते रुधिराविला।
आन्त्रेण पृथिवी दृष्टा परिक्षिप्ता जनार्दन॥ २९॥

महाभारत    उद्योगपर्व    अशीत्यधिकशततमोऽध्यायः

त एव मां महाराज स्वप्नदर्शनमेत्य वै ।

परिवार्याब्रुवन्वाक्यं तन्निबोध कुरूद्वह ॥ ८ ॥

महाभारत　　उद्योगपर्व　　एकाशीत्यधिकशततमोऽध्यायः

भीष्म उवाच

ततो रात्र्यां व्यतीतायां प्रतिबुद्धोऽस्मि भारत ।

तं च सञ्चिन्त्य वै स्वप्नमवापं हर्षमुत्तमम् ॥ १ ॥

महाभारत　　भीष्मपर्व　　सप्तविंशोऽध्यायः

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।

न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

युाहारविहारस्य युचेष्टस्य कर्मसु ।

युस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

महाभारत भीष्मपर्व एकोनचत्वारिंशोऽध्यायः

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी॥ ३५॥

महाभारत भीष्मपर्व षष्टितमोऽध्यायः

एवमादि मया सृष्टं पृथिव्यां त्वत्प्रसादजम्।
पद्मनाभ विशालाक्ष कृष्ण दुःस्वप्ननाशन॥ ६०॥

महाभारत द्रोणपर्व द्विचत्वारिंशोऽध्यायः

भानुकम्पी भगवांस्तस्य चक्रे ततो दयाम्।
स्वप्नान्तेऽप्यथ चैवाह हरः सिन्धुपतेः सुतम्।
वरं वृणीष्व प्रीतोऽस्मि जयद्रथकिमिच्छसि॥ १३॥

महाभारत द्रोणपर्व अष्टपञ्चाशत्तमोऽध्यायः

हा वीर दृष्टो नष्टश्च धनं स्वप्न इवासि मे।

अहो ह्यनित्यं मानुष्यं जलबुद्बुद चञ्चलम् ॥ १६ ॥

महाभारत द्रोणपर्व षष्टितमोऽध्यायः

तं तु शोकेन सन्तप्तं स्वप्ने कपिवरध्वजम् ।
आससाद महातेजा ध्यायन्तं गरुड ध्वजः ॥ २ ॥

महाभारत द्रोणपर्व द्विषष्ट्यधिकशततमोऽध्यायः

स्वप्नायमानास्त्वपरे परानिति विचेतसः ।
आत्मानं समरे जघ्नु स्वानेव च परानपि ॥ १८ ॥

महाभारत सौप्तिकपर्व चतुर्थोऽध्यायः

तदिदं समनुप्राप्तं पश्य मेऽद्य चतुष्टयम् ।
यस्य भागश्चतुर्थो मे स्वप्नमह्नाय नाशयेत् ॥ २२ ॥

महाभारत सौप्तिकपर्व अष्टमोऽध्यायः

स्वप्ने सुप्तान्नयन्तीभ तां रात्रिष्वन्यासु मारिष ।
ददृशुर्योधमुख्यास्ते घ्नन्तं द्रौणिं च नित्यदा ॥ ६६ ॥

महाभारत शांतिपर्व षष्ठोऽध्यायः

यद्वाच्च्यं हितकामेन सुहृदा भूतिमिच्छता ।
तथा दिवाकरेणोः स्वप्नान्ते मम चाग्रतः ॥ ६ ॥

महाभारत शांतिपर्व अष्टविंशोऽध्यायः

स्वप्नलब्धा यथा लाभा वि तथाः प्रतिबोधने ।
एवं ते क्षत्रिया राजन्ये व्यतीता महारणे ॥ ९ ॥

महाभारत शांतिपर्व त्रयत्रिंशोऽध्यायः

नावर्तते व्रतं स्वप्ने शुक्रमोक्षे कथं चन ।
आज्यहोमः समिद्धेऽग्नौ प्रायश्चित्तं विधीयते ॥ २६ ॥

महाभारत शांतिपर्व त्र्यधिकशततमोऽध्यायः

सुखमर्थाश्रयं येषामनुशोचामि तानहम् ।
मम ह्यर्थाः सुबहवो नष्टाः स्वप्न इवागताः ॥ ८ ॥

महाभारत शांतिपर्व नवाधिकशततमोऽध्यायः

मातापित्रोश्च ये वृत्तिं वर्तन्ते धर्मकोविदाः ।
वर्जयन्ति दिवा स्वप्नं दुर्गाण्यतितरन्ति ते ॥ ५ ॥

महाभारत शांतिपर्व सप्तपञ्चाशदधिकशततमोऽध्यायः

दर्पः क्रोधो मदः स्वप्नो हर्षः शोकोऽतिमानिता ।
तत एव हि कौरव्य दृश्यन्ते लुब्ध बुद्धिषु ।
एतानशिष्टान्बुध्यस्व नित्यं लोभसमन्वितान् ॥ १९ ॥

महाभारत शांतिपर्व त्रिनवत्यधिकशततमोऽध्यायः

अभिमानस्तथा मोहः प्रमादः स्वप्नतन्द्रिता ।
कथं चिदभिवर्तन्ते विविधास्तामसा गुणाः ॥ ३५ ॥

महाभारत शांतिपर्वं एकाधिकद्विशततमोऽध्यायः

यथात्मनोऽङ्गं पतितं पृथिव्यां
स्वप्नान्तरे पश्यति चात्मनोऽन्यत्।
श्रोत्रादि युः सुमनाः सुबुद्धिर्
लिङ्गात्तथा गच्छति लिङ्गमन्यत्॥ १४ ॥

महाभारत शांतिपर्वं त्रयधिकद्विशततमोऽध्यायः

मनुरुवाच
यथा व्यमिदं शेते स्वप्ने चरति चेतनम्।
ज्ञानमिन्द्रियसंयुं तद्वत्प्रेत्य भवाभवौ॥ १॥

महाभारत शांतिपर्वं नवाधिकद्विशततमोऽध्यायः

स्वप्नयोगे यथैवात्मा पञ्चेन्द्रिय समागतः।
देहमुत्सृज्य वै याति तथैवात्रोपलभ्यते॥ ४१ ॥

महाभारत शांतिपर्वं द्वादशाधिकद्विशततमोऽध्यायः

रमत्ययं यथा स्वप्ने मनसा देहवानिव ।

कर्म गर्भैर्गुणैर्देही गर्भे तदुपपद्यते ॥ १४ ॥

महाभारत शांतिपर्वं त्रयोदशाधिकद्विशततमोऽध्यायः

रागोत्पत्तौ चरेत्कृच्छ्रमह्नस्त्रिर्प्रविशेदपः ।

मग्नः स्वप्ने च मनसा त्रिर्जपेदघ मर्षणम् ॥ १३ ॥

स्वप्नेऽप्येवं यथाभ्येति मनःसङ्कल्पजं रजः ।

शुक्रमस्पर्शजं देहात्सृजन्त्यस्य मनोवहा ॥ २२ ॥

महाभारत शांतिपर्वं पञ्चदशाधिकद्विशततमोऽध्यायः

भीष्म उवाच

निष्कल्मषं ब्रह्मचर्यमिच्छता चरितुं सदा ।

निद्रा सर्वात्मना त्याज्या स्वप्नदोषानवेक्षता ॥ १ ॥

स्वप्ने हि रजसा देही तमसा चाभिभूयते ।
देहान्तरमिवापन्नश्चरत्यपगतस्मृतिः ॥ २ ॥

अहाह को न्वयं भावः स्वप्ने विषयवानिव ।
प्रलीनैरिन्द्रियैर्देही वर्तते देहवानिव ॥ ४ ॥

इन्द्रियाणां श्रमात्स्वप्नमाहुः सर्वगतं बुधाः ।
मनसस्तु प्रलीनत्वात्तत्तदाहुर्निदर्शनम् ॥ ६ ॥

कार्यव्यासमनसः सङ्कल्पो जाग्रतो ह्यपि ।
यद्वन्मनोरथैश्वर्यं स्वप्ने तद्वन्मनोगतम् ॥ ७ ॥

प्रसन्नैरिन्द्रियैर्यद्यत्सङ्कल्पयति मानसम् ।

तत्तत्स्वप्नेऽप्युपरते मनो दृष्टिर्निरीक्षते ॥ १२ ॥

महाभारत शांतिपर्वं अष्टादशाधिकद्विशततमोऽध्यायः

अविवेकस्तथा मोहः प्रमादः स्वप्नतन्द्रिता ।
कथं चिदपि वर्तन्ते विविधास्तामसा गुणाः ॥ २८ ॥

महाभारत शांतिपर्वं विंशत्यधिकद्विशततमोऽध्यायः

कुटुम्बिको धर्मकामः सदा स्वप्नश्च भारत ।
अमांसाशी सदा च स्यात्पवित्रं च सदा जपेत् ॥ ६ ॥

अभक्षयन्वृथा मांसममांसाशी भवत्युत ।
दाननित्यः पवित्रश्च अस्वप्नश्च दिवा स्वपन् ॥ ११ ॥

महाभारत शांतिपर्वं त्रिंशदधिकद्विशततमोऽध्यायः

अहोरात्रे विभजते सूर्यो मानुषलौकिके ।

रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणाम् अहर् ॥ १४ ॥

पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः ।
कृष्णोऽहः कर्म चेष्टायां शुक्लः स्वप्नाय शर्वरी ॥ १५ ॥

महाभारत शांतिपर्व एकोनचत्वारिंशदधिकद्विशततमोऽध्यायः

योगदोषान्समुच्छिद्य पञ्च यान्कवयो विदुः ।
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ॥ ४ ॥

महाभारत शांतिपर्व द्विपञ्चाशदधिकद्विशततमोऽध्यायः

मनो बुद्धिपराभूतः स्वदेहपरदेहवित् ।
स्वप्नेष्वपि भवत्येष विज्ञाता सुखदुःखयोः ॥ ८ ॥

महाभारत शांतिपर्व सप्तत्यधिकद्विशततमोऽध्यायः

ततः स ब्राह्मणः स्वप्ने कुन्दधारस्य तेजसा ।

अपश्यत्सर्वभूतानि कुशेषु शयितस्तदा ॥ १३ ॥

महाभारत शांतिपर्वं त्रिसप्तत्यधिकद्विशततमोऽध्यायः

कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ।
परित्यज्य निषेवेत तथेमान्योगसाधनान् ॥ १४ ॥

महाभारत शांतिपर्वं चतुःसप्तत्यधिकद्विशततमोऽध्यायः

इन्द्रियाणां व्युपरमे मनोऽनुपरतं यदि ।
सेवते विषयानेव तद्विद्यात्स्वप्नदर्शनात् ॥ २४ ॥

महाभारत शांतिपर्वं त्र्यशीत्यधिकद्विशततमोऽध्यायः

नञ्चर्या दिवा स्वप्नमालस्यं पैशुनं मदम् ।
अतियोगमयोगं च श्रेयसोऽर्थी परित्यजेत् ॥ २३ ॥

महाभारत शांतिपर्वं अष्टाधिकत्रिशततमोऽध्यायः

अहः क्षयमथो बुद्ध्वा निशि स्वप्नमनास्तथा ।
चोदयामास भवगानव्योऽहं कृतं नरम् ॥ ३ ॥

महाभारत शांतिपर्व नवाधिकत्रिशततमोऽध्यायः

दिवा स्वप्ने विवादे च प्रमादेषु च वै रतिः ।
नृत्यवादित्रगीतानामज्ञानाच्छ्रद्दधानता ।
द्वेषो धर्मविशेषाणामेते वै तामसा गुणाः ॥ २७ ॥

महाभारत अनुशासनपर्व द्विपञ्चाशत्तमोऽध्यायः

तं दृष्ट्वात्यद्भुतं राजा मनसाचिन्तयत्तदा ।
स्वप्नोऽयं चित्तविभ्रंश उताहो सत्यमेव तु ॥ १५ ॥

महाभारत अनुशासनपर्व षट्षष्टितमोऽध्यायः

स हि पुत्रान्यशोऽर्थं च श्रियं चाप्यधिगच्छति ।
नाशयत्यशुभं चैव दुःस्वप्नं च व्यपोहति ॥ १२ ॥

महाभारत अनुशासनपर्व अष्टषष्टितमोऽध्यायः

स पर्यपृच्छत्तं पुत्रं श्लाघ्यं प्रत्यागतं पुनः ।
दिव्यैर्गन्धैः समादिग्धं क्षीणस्वप्नमिवोत्थितम् ॥ ११ ॥

महाभारत अनुशासनपर्व सप्ततितमोऽध्यायः

शरीरन्यास मोक्षेण मनसा निर्मलेन च ।
स्वप्नभूतांश्च ताँङ्ोकान्पश्यन्तीहापि सुव्रतः ॥ ४ ॥

महाभारत अनुशासनपर्व पञ्चसप्ततितमोऽध्यायः

गाश्च सङ्कीर्तयेन्नित्यं नावमन्येत गास्तथा ।
अनिष्टं स्वप्नमालक्ष्य गां नरः सम्प्रकीर्तयेत् ॥ १७ ॥

महाभारत अनुशासनपर्व एकाशीतितमोऽध्यायः

ततः सोऽन्तर्हितो बाहुः पुतुर्मम नराधिप ।
ततो मां दर्शयामासुः स्वप्नान्ते पितरस्तदा ॥ २१ ॥

महाभारत अनुशासनपर्वं द्व्यशीतितमोऽध्यायः

आदित्योदयने प्राप्ते विधिमन्त्रपुरस्कृतम् ।
ददाति काञ्चनं यो वै दुःस्वप्नं प्रतिहन्ति सः ॥ १४१ ॥

महाभारत अनुशासनपर्वं नवतितमोऽध्यायः

मुनिश्च स्यात्सदा विप्रो देवांश्चैव सदा यजेत् ।
कुटुम्बिको धर्मकामः सदा स्वप्नश्च भारत ॥ ६ ॥

अभक्षयन्वृथा मांसममांसाशी भवत्युत ।
दानं ददत्पवित्री स्यादस्वप्नश्च दिवा स्वपन् ॥ १२ ॥

महाभारत अनुशासनपर्वं एकाधिकशततमोऽध्यायः

अनायुष्यो दिवा स्वप्नस्तथाभ्युदित शायिता ।
प्रातर्निशायां च तथा ये चोच्छिष्टाः स्वपन्ति वै ॥ १३१ ॥

महाभारत अनुशासनपर्व अष्टाविंशत्यधिकशततमोऽध्यायः

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः॥ ११२॥

महाभारत आश्वमेधिकपर्व प्रथमोऽध्यायः

शोचितव्यं मया चैव गान्धार्या च विशां पते।
पुत्रैर्विहीनो राज्येन स्वप्नलब्धधनो यथा॥ ९॥

महाभारत आश्वमेधिकपर्व सप्तदशोऽध्यायः

रसातियुमन्नं वा दिवा स्वप्नं निषेवते।
अपक्वानागते काले स्वयं दोषान्प्रकोपयन्॥ १२॥

महाभारत आश्वमेधिकपर्व एकोनविंशोऽध्यायः

यथा हि पुरुषः स्वप्ने दृष्ट्वा पश्यत्यसाविति।

तथारूपमिवात्मानं साधु युः प्रपश्यति ॥ २० ॥

महाभारत आश्वमेधिकपर्व द्वाविशोऽध्यायः

विषयानेवमस्माभिर्दर्शितानभिमन्यसे ।
अनागतानतीतांश्च स्वप्ने जागरणे तथा ॥ २५ ॥

बहूनपि हि सङ्कल्पान्मत्वा स्वप्नानुपास्य च ।
बुभुक्षया पीड्यमानो विषयानेव धावसि ॥ २७ ॥

महाभारत आश्वमेधिकपर्व एकत्रिंशोऽध्यायः

शोकः क्रोधोऽतिसंरम्भो राजसास्ते गुणाः स्मृताः ।
स्वप्नस्तन्द्री च मोहश्च त्रयस्ते तामसा गुणाः ॥ २ ॥

महाभारत आश्वमेधिकपर्व षट्त्रिंशोऽध्यायः

संमोहोऽज्ञानमत्यागः कर्मणामविनिर्णयः ।

स्वप्नः स्तम्भो भयं लोभः शोकः सुकृतदूषणम् ॥ १२ ॥

महाभारत आश्वमेधिकपर्व पञ्चाशत्तमोऽध्यायः

प्रसादेनैव सत्त्वस्य प्रसादं समवाप्नुयात् ।
लक्षणं हि प्रसादस्य यथा स्यात्स्वप्नदर्शनम् ॥ ३५ ॥

महाभारत मौसलपर्व तृतीयोऽध्यायः

वैशम्पायन उवाच
काली स्त्री पाण्डुरैर्दन्तैः प्रविश्य हसती निशि ।
स्त्रियः स्वप्नेषु मुष्णन्ती द्वारकां परिधावति ॥ १ ॥

रामायण वाल्मीकि रामायण बालकाण्ड सर्गः ३

अभिज्ञानप्रदानं च सीतायाश्चापि भाषणम् ।
राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनम् ॥ २१ ॥

रामायण वाल्मीकि रामायण अयोध्याकाण्ड सर्गः ४

अपि चाद्याशुभान्नाम स्वप्नान्पश्यामि दारुणान् ।
सनिर्घाता महोल्काश्च पतन्तीह महास्वनाः ॥ १७ ॥

रामायण वाल्मीकि रामायण अयोध्याकाण्ड सर्गः ६३

यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम् ।
भरतेनापि तां रात्रिं स्वप्नो दृष्टोऽयमप्रियः ॥ १ ॥

व्युष्टामेव तु तां रात्रिं दृष्ट्वा तं स्वप्नमप्रियम् ।
पुत्रो राजाधिराजस्य सुभृशं पर्यतप्यत ॥ २ ॥

स्वप्ने पितरमद्राक्षं मलिनं मुमूर्धजम् ।
पतन्तमद्रिशिखरात्कलुषे गोमये ह्रदे ॥ ८ ॥

स्वप्नेऽपि सागरं शुष्कं चन्द्रं च पतितं भुवि ।
सहसा चापि संशान्तं ज्वलितं जातवेदसं ॥ ११ ॥

नरो यानेन यः स्वप्ने खरयुेन याति हि ।
अचिरात्तस्य धूमाग्रं चितायां सम्प्रदृश्यते ।
एतन्निमित्तं दीनोऽहं तन्न वः प्रतिपूजये ॥ १६ ॥

इमां हि दुःस्वप्नगतिं निशाम्य ताम्
अनेकरूपामवितर्कितां पुरा ।
भयं महत्तद्धृदयान्न याति मे
विचिन्त्य राजानमचिन्त्यदर्शनम् ॥ १८ ॥

रामायण वाल्मीकि रामायण अयोध्याकाण्ड सर्गः ६४
भरते ब्रुवति स्वप्नं दूतास्ते क्लान्तवाहनाः ।
प्रविश्यासह्यपरिखं रम्यं राजगृहं पुरम् ॥ १ ॥

रामायण वाल्मीकि रामायण अयोध्याकाण्ड सर्गः ८२

अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति मा ।

मुह्यते खलु मे भावः स्वप्नोऽयमिति मे मतिः ॥ ९ ॥

रामायण  वाल्मीकि रामायण  अयोध्याकाण्ड  सर्गः ८५

व्यस्मयन्त मनुष्यास्ते स्वप्नकल्पं तदद्भुतम् ।
दृष्ट्वातिथ्यं कृतं तादृग्भरतस्य महर्षिणा ॥ ७४ ॥

रामायण  वाल्मीकि रामायण  अयोध्याकाण्ड  सर्गः ११०

असञ्चाल्यं मनुष्यैश्च यत्नेनापि च गौरवात् ।
तन्न शा नमयितुं स्वप्नेष्वपि नराधिपाः ॥ ३९ ॥

रामायण  वाल्मीकि रामायण  अरण्यकाण्ड
 सर्गः ३७

राममेव हि पश्यामि रहिते राक्षसेश्वर ।
दृष्ट्वा स्वप्नगतं राममुद्भ्रमामि विचेतनः ॥ १७ ॥

रामायण  वाल्मीकि रामायण  अरण्यकाण्ड

सर्गः ६९

शयानः पुरुषो राम तस्य शैलस्य मूर्धनि ।
यत्स्वप्ने लभते वित्तं तत्प्रबुद्धोऽधिगच्छति ॥ २५ ॥

रामायण वाल्मीकि रामायण सुन्दरकाण्ड सर्गः २५

स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ।
राक्षसानामभावाय भर्तुरस्या भवाय च ॥ ६ ॥

कथयस्व त्वया दृष्टः स्वप्नेऽयं कीदृशो निशि ॥ ८ ॥

तासां श्रुत्वा तु वचनं राक्षसीनां मुखोद्गतम् ।
उवाच वचनं काले त्रिजटास्वप्नसंश्रितम् ॥ ९ ॥

स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता ।

सागरेण परिक्षिप्तं श्वेतपर्वतमास्थिता ।
रामेण सङ्गता सीता भास्करेण प्रभा यथा ॥ ११ ॥

यस्या ह्येवं विधः स्वप्नो दुःखितायाः प्रदृश्यते ।
सा दुःखैर्बहुभिर्मुा प्रियं प्राप्नोत्यनुत्तमम् ॥ २९ ॥

रामायण वाल्मीकि रामायण सुन्दरकाण्ड सर्गः ३०

सा तु दृष्ट्वा हरिश्रेष्ठं विनीतवदुपस्थितम् ।
मैथिली चिन्तयामास स्वप्नोऽयमिति भामिनी ॥ २ ॥

स्वप्नो मयायं विकृतोऽद्य दृष्टः
शाखामृगः शास्त्रगणैर्निषिद्धः ।
स्वस्त्यस्तु रामाय सलक्ष्मणाय
तथा पितुर्मे जनकस्य राज्ञः ॥ ४ ॥

स्वप्नोऽपि नायं न हि मेऽस्ति निद्रा
शोकेन दुःखेन च पीडितायाः।
सुखं हि मे नास्ति यतोऽस्मि हीना
तेनेन्दुपूर्णप्रतिमाननेन॥ ५॥

रामायण वाल्मीकि रामायण सुन्दरकाण्ड सर्गः ३२

अहो स्वप्नस्य सुखता याहमेवं चिराहृता।
प्रेषितं नाम पश्यामि राघवेण वनौकसं॥ १९॥

स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम्।
पश्येयं नावसीदेयं स्वप्नोऽपि मम मत्सरी॥ २०॥

नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम्।
न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम॥ २१॥

रामायण वाल्मीकि रामायण युद्धकाण्ड सर्गः २६

कालिकाः पाण्डुरैर्दन्तैः प्रहसन्त्यग्रतः स्थिताः ।
स्त्रियः स्वप्नेषु मुष्णन्त्यो गृहाणि प्रतिभाष्य च ॥ २५ ॥

रामायण वाल्मीकि रामायण युद्धकाण्ड सर्गः ७८

कुबेरेण स्वयं स्वप्ने यद्दत्तममितात्मना ।
दुर्जयं दुर्विषह्यं च सेन्द्रैरपि सुरासुरैः ॥ १५ ॥

रामायण अध्यात्मरामायण अयोध्या काण्डः सर्ग १

जाग्रत्स्वप्नसुषुप्ताख्या संसृतिर्या प्रवर्तते ।
तस्या विलक्षणः साक्षी चिन्मात्रस्त्वं रघूत्तम ॥ २४ ॥

रामायण अध्यात्मरामायण अयोध्या काण्डः सर्गः ३

शनैरुन्मील्य नयने विमृज्य परया भिया ।
दुःस्वप्नो वा मया दृष्टोह्यथवा चित्तविभ्रमः ॥ २४ ॥

रामायण अध्यात्मरामायण अयोध्या काण्डः सर्गः ४

छायेव लक्ष्मीश्चपला प्रतीता
तारुण्यमम्बूर्मिवदध्रुवं च ।
स्वप्नोपमं स्त्रीसुखमायुरल्पं
तथापि जन्तोरभिमान एषः ॥ २४ ॥

संसृतिः स्वप्नसदृशी सदा रोगादिसङ्कुला ।
गान्धरवनगरप्रख्या मूढस्तामनुवर्तते ॥ २५ ॥

रामायण अध्यात्मरामायण अरण्यकाण्डः सर्गः ३

जाग्रत्स्वप्नसुषुप्त्याख्या वृत्तयो बुद्धिजैर्गुणैः ।
तासां विलक्षणो राम त्वं साक्षी चिन्मयोऽव्ययः ॥ ३० ॥

अतस्त्वद्भक्तिसम्पन्ना मुा एव न संशयः ।
त्वद्भक्त्यमृतहीनानां मोक्षः स्वप्नेऽपि नो भवेत् ॥ ३६ ॥

रामायण अध्यात्मरामायण अरण्यकाण्डः सर्गः ४

असदेव हि तत्सर्वं यथा स्वप्नमनोरथौ ।
देह एव हि संसारवृक्षमूलं दृढं स्मृतम् ॥ २६ ॥

रामायण अध्यात्मरामायण अरण्यकाण्डः सर्गः ६

स्वप्नदृष्टिगतराघवं तदा
बोधितो विगतनिद्रा आस्थितः ।
तद्भवापि विमुच्य चाग्रहं
राघवं प्रति गृहं प्रयाहि भोः ॥ २४ ॥

रामायण अध्यात्मरामायण किष्किन्धाकाण्डः सर्गः ३

मिथ्यारोपितसंसारो न स्वयं विनिवर्तते ।
विषयाध्यायमानस्य स्वप्ने मिथ्यागमो यथा ॥ १९ ॥

रामायण अध्यात्मरामायण किष्किन्धाकाण्डः सर्गः ८

कुटुम्बभरणासक्त्या न्यायान्यायेर्धनार्जनम् ।
कृतं नाकरवं विष्णुचिन्तां स्वप्नेऽपि दुर्भगः ॥ ३५ ॥

रामायण अध्यात्मरामायण सुन्दरकाण्डः सर्गः २

स्वप्ने रामेण सन्दिष्टः कश्चिदागत्य वानरः ।
कामरुपधरः सूक्ष्मो वृक्षाग्रस्थोऽनुपशयति ॥ १७ ॥

इति दृष्ट्वाद्भुतं स्वप्नं स्वात्मन्येवानुचिन्त्य सः ।
स्वप्नः कदाचित्सत्यः स्यादेवं तत्र करोम्यहम् ॥ १८ ॥

न् भीषयध्वं रुदतीभ ननस्कुरुत जानकीम् ।
इदानीमेव मे स्वप्ने रामः कमललोचनः ॥ ४९ ॥

रामायण अध्यात्मरामायण सुन्दरकाण्डः सर्गः ३

स्वप्नो वा मे मनोभ्रान्तिर्यदि वा सत्यमेव तत्।
निद्रा मे नास्ति दुःखेन जानाम्येतत्कुतो भ्रमः॥ १७॥

रामायण अध्यात्मरामायण युद्धकाण्डः सर्गः ११

श्रुत्वा रामात्स्वनिधनं भयात्सर्वत्र राघवम्।
पश्यन्ननुदिनं स्वप्ने राममेवानुपश्यति॥ ८५॥

रामायण अध्यात्मरामायण उत्तरकाण्डः सर्गः ५

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते
स्वप्नादिभेदेन् गुणत्रयात्मनः।
अन्योन्यतोऽस्मिन्व्यभिचारतो मृषा
नित्ये परे ब्रह्मणि केवले शिवे॥ ३२॥

रामायण अध्यात्मरामायण उत्तरकाण्डः सर्गः ७

प्रतिबुद्ध इव स्वप्नाच्चकारानन्तराः क्रियाः।
विससर्ज ऋषीन् सर्वानृत्विजो ये समागताः॥ ५०॥

स्मृति	मनुस्मृति	प्रथमोऽध्यायः

एवं स जाग्रत् - स्वप्नाभ्याम् इदं सर्वं चर-अचरम् ।
संजीवयति च-अजस्रं प्रमापयति च-अव्ययः ॥ ५७ ॥

अहोरात्रे विभजते सूर्यो मानुष-दैविके ।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणाम् अहः ॥ ६५ ॥

पित्र्ये रात्रि-अहनी मासः प्रविभागस् तु पक्षयोः ।
कर्म-चेष्टास्व् अहः कृष्णः शुक्लः स्वप्नाय शर्वरी ॥ ६६ ॥

स्मृति	मनुस्मृति	द्वितीयोऽध्यायः

स्वप्ने सित्त्वा ब्रह्मचारी द्विजः शुक्रम् अकामतः ।
स्नात्वा-अर्कम् अर्चयित्वा त्रिः पुनर् माम् इत्यृचं जपेत् ॥ १८१ ॥

पुराण भागवत पुराण द्वितियः स्कन्धः प्रथमोऽध्यायः

स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः।
तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः॥ ३९॥

पुराण भागवत पुराण द्वितियः स्कन्धः नवमोऽध्यायः

श्रीशुक उवाच

आत्ममायामृते राजन्परस्यानुभवात्मनः।
न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा॥ १॥

पुराण भागवत पुराण तृतीय स्कन्धः सप्तविंशोऽध्यायः

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा॥ ४॥

पुराण भागवत पुराण तृतीय स्कन्धः त्रयस्त्रिंऽशोध्यायः

नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा।
न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः॥ २७॥

पुराण भागवत पुराण चतुर्थः स्कन्धः द्वादशोऽध्यायः

मन्यमान इदं विश्वं मायारचितमात्मनि ।
अविद्यारचितस्वप्नगन्धर्वनगरोपमम् ॥ १५ ॥

पुराण भागवत पुराण चतुर्थः स्कन्धः द्वाविंशोऽध्यायः

दग्धाशयो मुसमस्ततद्गुणो नैवात्मनो बहिरन्तर्विचष्टे ।
परात्मनोर्यद्व्यवधानं पुरस्तात्स्वप्ने यथा पुरुषस्तद्विनाशे ॥ २७ ॥

पुराण भागवत पुराण चतुर्थः स्कन्धः अष्टविंशःअध्यायः

स व्यापकतयात्मानं व्यतिरितयात्मनि ।
विद्वान्स्वप्न इवामर्शं साक्षिणं विरराम ह ॥ ४० ॥

पुराण भागवत पुराण चतुर्थः स्कन्धः एकोनत्रिंशःअध्यायः

नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम् ।

द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥ ३४ ॥

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।
मनसा लिङ्गरूपेण स्वप्ने विचरतो यथा ॥ ३५ ॥

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ७३ ॥

पुराण    भागवत पुराण   पञ्चमः स्कन्धः   एकादशोऽध्यायः

न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ।
स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥ ३ ॥

पुराण    भागवत पुराण   पञ्चमः स्कन्धः   चतुर्दशोऽध्यायः

कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति
स्वप्ननिर्वृतिलक्षणमनुभवति ॥ १७ ॥

पुराण  भागवत पुराण  षष्टः स्कन्धः  प्रथमोऽध्यायः

सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान्स्वप्नेऽपि
पश्यन्ति हि चीर्णनिष्कृताः ॥ १९ ॥

पुराण  भागवत पुराण  षष्टः स्कन्धः  द्वितीयोऽध्यायः

किमिदं स्वप्न आहो स्वित्साक्षाद्दृष्टमिहाद्भुतम् ।
क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः ॥ ३० ॥

पुराण  भागवत पुराण  षष्टः स्कन्धः  चतुर्थोऽध्यायः

श्रीशुक उवाच
इत्युक्त्वा मिषतस्तस्य भगवान्विश्वभावनः ।
स्वप्नोपलब्धार्थ इव तत्रैवान्तर्दधे हरिः ॥ ५४ ॥

पुराण  भागवत पुराण  षष्टः स्कन्धः  पञ्चदशोऽध्यायः

सर्वेऽपि शूरसेनेमे शोकमोहभयार्तिदाः ।
गन्धर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥ २३ ॥

पुराण भागवत पुराण षष्ठः स्कन्धः षोडशोऽध्यायः

यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥ ५३ ॥

पुराण भागवत पुराण सप्तमः स्कन्धः द्वितीयोऽध्यायः

वितथाभिनिवेशोऽयं यद्गुणेष्वर्थदृग्वचः ।
यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा ॥ ४८ ॥

पुराण भागवत पुराण सप्तमः स्कन्धः सप्तमोऽध्यायः

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ।
ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥

एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः ।
अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवाप्यते ॥ २७ ॥

पुराण भागवत पुराण सप्तमः स्कन्धः चतुर्दशोऽध्यायः

सत्सङ्गाच्छनकैः सङ्गमात्मजायात्मजादिषु ।
विमुञ्चेन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥ ५ ॥

पुराण भागवत पुराण सप्तमः स्कन्धः पञ्चदशोऽध्यायः

स्यात्सादृश्यभ्रमस्तावद्विकल्पे सति वस्तुनः ।
जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६१ ॥

भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः ।
वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ॥ ६२ ॥

पुराण भागवत पुराण अष्टमः स्कन्धः चतुर्थोऽध्यायः

एतन्महाराज तवेरितो मया
कृष्णानुभावो गजराजमोक्षणम् ।
स्वर्ग्यं यशस्यं कलिकल्मषापहं
दुःस्वप्ननाशं कुरुवर्य शृण्वताम् ॥ १४ ॥

यथानुकीर्तयन्त्येतच्छ्रेयस्कामा द्विजातयः ।
शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये ॥ १५ ॥

पुराण भागवत पुराण अष्टमः स्कन्धः दशमोऽध्यायः

तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः ।
स्वप्नो यथा हि प्रतिबोध आगते
हरिस्मृतिः सर्वविपद्विमोक्षणम् ॥ ५५ ॥

पुराण भागवत पुराण अष्टमः स्कन्धः षोडशोऽध्यायः

प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशीम् ।

ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिषवणं चरेत् ॥ ४८ ॥

पुराण भागवत पुराण नवमः स्कन्धः चतुर्थोऽध्यायः

मेनेऽतिदुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतम् ।
विद्वान्विभवनिर्वाणं तमो विशति यत्पुमान् ॥ १६ ॥

पुराण भागवत पुराण नवमः स्कन्धः अष्टादशोऽध्यायः

यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ।
नानेव भाति नाभाति स्वप्नमायामनोरथः ॥ ४९ ॥

पुराण भागवत पुराण नवमः स्कन्धः एकोनविंशोऽध्यायः

सर्वत्र सङ्गमुत्सृज्य स्वप्नौपम्येन भार्गवी ।
कृष्णे मनः समावेश्य व्यधुनोऽलिङ्गमात्मनः ॥ २८ ॥

पुराण भागवत पुराण नवमः स्कन्धः एकविंशशोऽध्यायः

ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः ।

माया गुणमयी राजन्स्वप्नवत्प्रत्यलीयत ॥ १७ ॥

पुराण भागवत पुराण दशमः स्कन्धः प्रथमोऽध्यायः

स्वप्ने यथा पश्यति देहमीदृशं

मनोरथेनाभिनिविष्टचेतनः ।

दृष्टश्रुताभ्यां मनसानुचिन्तयन्प्रपद्यते

तत्किमपि ह्यपस्मृतिः ॥ ४१ ॥

पुराण भागवत पुराण दशमः स्कन्धः षष्ठोऽध्यायः

स्वप्नदृष्टा महोत्पाता वृद्धा बालग्रहाश्च ये ।

सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ॥ २९ ॥

पुराण भागवत पुराण दशमः स्कन्धः अष्टमोऽध्यायः

किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः ।

अथो अमुष्यैव ममार्भकस्य यः

कश्चनौत्पत्तिक आत्मयोगः ॥ ४० ॥

पुराण भागवत पुराण दशमः स्कन्धः चतुर्दशोऽध्यायः

तस्मादिदं जगदशेषमसत्स्वरूपं
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ।
त्वय्येव नित्यसुखबोधतनावनन्ते
मायात उद्यदपि यत्सदिवावभाति ॥ २२ ॥

पुराण भागवत पुराण दशमः स्कन्धः चत्वारिंशोऽध्यायः

अहं चात्मात्मजागार दारार्थस्वजनादिषु ।
भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो ॥ २४ ॥

पुराण भागवत पुराण दशमः स्कन्धः द्विचत्वारिंशोऽध्यायः

स्वप्ने प्रेतपरिष्वङ्गः खरयानं विषादनम् ।
यायान्नलदमाल्येकस्तैलाभ्यो दिगम्बरः ॥ ३० ॥

अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च ।
पश्यन्मरणसन्त्रस्तो निद्रां लेभे न चिन्तया ॥ ३१ ॥

पुराण भागवत पुराण दशमः स्कन्धः सप्तचत्वारिंशोऽध्यायः

आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः ।
सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ ३१ ॥

येनेन्द्रियार्थान्ध्यायेत मृषा स्वप्नवदुत्थितः ।
तन्निरुन्ध्यादिन्द्रियाणि विनिद्रः प्रत्यपद्यत ॥ ३२ ॥

पुराण भागवत पुराण दशमः स्कन्धः एकोनपञ्चाशत्तमोऽध्यायः

तस्माच्छोकमिमं राजन्स्वप्नमायामनोरथम् ।
वीक्ष्यायम्यात्मनात्मानं समः शान्तो भव प्रभो ॥ २५ ॥

पुराण भागवत पुराण दशमः स्कन्धः द्विषष्टितमोऽध्यायः

तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम्।
कन्यालभत कान्तेन प्रागदृष्टश्रुतेन सा ॥ १२ ॥

दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः।
पीतवासा बृहद्बाहुर्योषितां हृदयंगमः ॥ १६ ॥

पुराण भागवत पुराण दशमः स्कन्धः सप्ततितमोऽध्यायः

स्वप्नायितं नृपसुखं परतन्त्रमीश
शश्वद्भयेन मृतकेन धुरं वहामः।
हित्वा तदात्मनि सुखं त्वदनीहलभ्यं
क्लिश्यामहेऽतिकृपणास्तव माययेह ॥ २८ ॥

पुराण भागवत पुराण एकादशः स्कन्धः द्वितीयोऽध्यायः

अविद्यमानोऽप्यवभाति हि द्वयो
ध्यातुर्धिया स्वप्नमनोरथौ यथा।

तत्कर्मसङ्कल्पविकल्पकं मनो बुधो

निरुन्ध्यादभयं ततः स्यात् ॥ ३८ ॥

पुराण भागवत पुराण एकादशः स्कन्धः तृतीयोऽध्यायः

श्रीपिप्पलायन उवाच

स्थित्युद्भवप्रलयहेतुरहेतुरस्य

यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च ।

देहेन्द्रियासुहृदयानि चरन्ति येन

सञ्जीवितानि तदवेहि परं नरेन्द्र ॥ ३५ ॥

पुराण भागवत पुराण एकादशः स्कन्धः एकादशोऽध्यायः

शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया ।

स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥ २ ॥

देहस्थोऽपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः ।

अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग्यथा ॥ ८ ॥

वैशारद्येक्षयासङ्ग शितया छिन्नसंशयः ।
प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्तते ॥ १३ ॥

पुराण भागवत पुराण एकादशः स्कन्धः त्रयोदशोऽध्यायः

जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः ।
तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥ २७ ॥

यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः ।
जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥ ३० ॥

असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा ।
गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३१ ॥

यो जागरे बहिरनुक्षणधर्मिणोऽर्थान्
भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान्।
स्वप्ने सुषुप्त उपसंहरते स एकः
स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः॥ ३२॥

ईक्षेत विभ्रममिदं मनसो विलासं
दृष्टं विनष्टमतिलोलमलातचक्रम्।
विज्ञानमेकमुरुधेव विभाति माया
स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः॥ ३४॥

पुराण भागवत पुराण एकादशः स्कन्धः चतुर्दशोऽध्यायः

तस्मादसदभिध्यानं यथा स्वप्नमनोरथम्।
हित्वा मयि समाधत्स्व मनो मद्भावभावितम्॥ २८॥

पुराण भागवत पुराण एकादशः स्कन्धः सप्तदशोऽध्यायः

पुत्रदाराप्तबन्धूनां सङ्गमः पान्थसङ्गमः।

अनुदेहं वियन्त्येते स्वप्नो निद्रानुगो यथा ॥ ५३ ॥

पुराण भागवत पुराण एकादशः स्कन्धः एकविंशशोऽध्यायः

स्वप्नोपमममुं लोकमसन्तं श्रवणप्रियम् ।
आशिषो हृदि सङ्कल्प्य त्यजन्त्यर्थान्यथा वणिक् ॥ ३१ ॥

पुराण भागवत पुराण एकादशः स्कन्धः द्वाविंशोऽध्यायः

जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद ।
विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ॥ ३९ ॥

स्वप्नं मनोरथं चेत्थं प्रानं न स्मरत्यसौ ।
तत्र पूर्वमिवात्मानमपूर्वम्चानुपश्यति ॥ ४० ॥

यथा मनोरथधियो विषय्षानुभवो मृषा ।
स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ॥ ५४ ॥

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते । ।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ५५ ॥

पुराण भागवत पुराण एकादशः स्कन्धः पञ्चविंशोऽध्यायः

सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ।
प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु सन्ततम् ॥ २० ॥

पुराण भागवत पुराण एकादशः स्कन्धः अष्टविंशःअध्यायः

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ १३ ॥

पुराण भागवत पुराण द्वादशः स्कन्धः चतुर्थोऽध्यायः

न स्वप्नजाग्रन्न च तत्सुषुप्तं
न खं जलं भूरनिलोऽग्निरर्कः ।

संसुप्तवच्छून्यवदप्रतर्क्यं
तन्मूलभूतं पदमामनन्ति ॥ २१ ॥

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते ।
मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि ॥ २५ ॥

पुराण भागवत पुराण द्वादशः स्कन्धः पञ्चमोऽध्यायः

स्वप्ने यथा शिरश्छेदं पञ्चत्वाद्यात्मनः स्वयम् ।
यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ॥ ४ ॥

पुराण भागवत पुराण द्वादशः स्कन्धः सप्तमोऽध्यायः

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु । ।
मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥ १९ ॥

पुराण भागवत पुराण द्वादशः स्कन्धः दशमोऽध्यायः

सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ।
गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा ॥ ३० ॥

शंकराचार्य कृतिः आत्मबोधः

संसारः स्वप्नतुल्यो हि रागद्वेषादिसङ्कुलः ।
स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत् ॥ ६ ॥

शंकराचार्य कृतिः अपरोक्षानुभूति

अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥ ५६ ॥

स्वप्नो जागरणेऽलीकः स्वप्नेऽपि जागरो न हि ।
द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥ ५७ ॥

तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ।

देहादीनामसत्त्वत्तु यथा स्वप्नो विबोधतः ॥ ९१ ॥

स्वप्नदेहो यथाध्यस्थस्तथैवायं हि देहकः ।
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कुतः ॥ ९३ ॥

शंकराचार्य कृतिः  दशश्लोकी

न जाग्रन् न मे स्वप्नको वा सुषुप्तिः
 न विश्वौ न वा तैजसः प्राज्ञको वा ।
अविद्यात्मकत्वात् त्रयाणं तुरीयः
 तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ८ ॥

शंकराचार्य कृतिः  लघुवाक्यवृत्तिः

जागरस्वप्नयोरेव बोधाभासविडम्बना ।
सुप्तौ तु तङ्ये बोधः शुद्धो जाड्यं प्रकाशयेत् ॥ ४ ॥

शंकराचार्य कृतिः  मातृपञ्चकम

गुरुकुलमुपसृत्य स्वप्नकाले तु दृष्ट्वा
   यतिसमुचितवेशं प्रारुदो मां त्वमुच्चैः ।
गुरुकुलमथ सर्वं प्रारुदत्ते समक्षं
   सपदि चरणयोस्ते मातरस्तु प्रणामः ॥ ४ ॥

## शंकराचार्य कृतिः मनीषापञ्चकं

॥मनीषापञ्चकं ॥

अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात् ।
यतिवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥
प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावभोधाम्बुधौ
विप्रोऽयं श्वपचोऽयमित्यपि महान्कोऽयं विभेधभ्रमः ।
किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चाण्डालवीथीपयः
पूरे वाऽन्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाऽम्बरे ॥
जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चे
च्चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ १ ॥

शंकराचार्य कृतिः      पञ्चीकरणम्   शंकराचार्यविरचितम्

करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः

सविषयः स्वप्न इत्युच्यते ।

यदुभयाभिमान्यात्मा तैजसः ।

एतत् त्रयमुकारः ॥ ३ ॥

शंकराचार्य कृतिः      पञ्चीकरणवार्त्तिकम्   श्रीसुरेश्वराचार्यविरचितम्

ग्राह्यग्राहकरूपेण स्फुरणं स्वप्न उच्यते ।

अभिमानी तयोर्यस्तु तैजसः परिकीर्तितः ॥ ३८ ॥

शंकराचार्य कृतिः      प्रबोधसुधाकरः

चिरमानन्दानुभवात्सुषुप्तिरिव काप्यवस्थाभूत् ।

परमात्मनस्तु तस्मात्स्वप्नवदेवोत्थिता माया ॥ ९८ ॥

स्वप्ने सुरतानुभवाच्छुक्रद्रावोयथा शुभे वसने ।
अनृतं रतं प्रबोधे वसनोपहतिर्भवेत्सत्या ॥ १०१ ॥

स्वप्ने पुरुषः सत्यो योषिदसत्या तयोर्युतिश्च मृषा ।
शुक्रद्रावः सत्यस्तद्वत्प्रकृतेऽपि संभवति ॥ १०२ ॥

शंकराचार्य कृतिः श्रीशङ्करचार्य अष्टोत्तरसहस्रनामावलिः

ॐ चिन्मात्रपरमानन्दलहरीमग्नमानसाय नमः ।
ॐ कृपाणकरकापालिवधोद्योगानवेक्षकाय नमः ।
ॐ ज्ञातवृत्तान्तपद्माङ्घ्रिमारितस्वीयशत्रुकाय नमः ।
ॐ नृसिम्हवेषपद्माङ्घ्रिकृतार्भटविचालिताय नमः ।
ॐ समाधिव्युत्थितमतये नमः ।
ॐ उन्मीलितविलोचनाय नमः ।
ॐ तदघहासनिर्घोषबधिरीभूतकर्णकाय नमः ।
ॐ दंष्ट्राकरालवदनश्रीमन्नृहरिदर्शकाय नमः ।
ॐ आक्स्मिकनृसिम्हावलोकनस्तिमितान्तराय नमः ।
ॐ निर्भीताय नमः ।

ॐ गलदानन्दभाष्पाय नमः ।

ॐ स्तुतिपरायणाय नमः ।

ॐ नृसिम्हक्रोधशान्त्यर्थप्रार्थनातत्पराय नमः ।

ॐ यतये नमः ।

ॐ नृसिम्हावेशसम्भ्रान्तपद्मपादप्रदर्शकाय नमः ।

ॐ स्वप्नायितस्ववृत्तान्तज्ञातृपद्माङ्घ्रिप्रणताय नमः ।

ॐ विस्मयाकुलाय नमः ।

ॐ गोकर्णाभ्यर्णसञ्चारिणे नमः ।

ॐ गोकर्णेश्वरपादाब्जप्रणन्त्रे नमः ।

ॐ प्रीतमानसाय नमः ।

ॐ गोकर्णनाथसम्स्तोत्रे नमः ।

ॐ त्रिरात्रस्थितितत्पराय नमः ।

ॐ मूकाम्बिकामहादेवीसन्दर्शनकृतार्थधिये नमः ।

ॐ द्विजदम्पतिसन्दर्शिने नमः ।

ॐ तद्रोदनविखिन्नधिये नमः ।

ॐ तदङ्कगामिमृतकशिशुसन्दर्शनातुराय नमः ।

ॐ अनङ्गवाणीसम्श्रोत्रे नमः ।

ॐ पुत्रोज्जीवनलालसाय नमः ॥८७० ॥

शंकराचार्य कृतिः उपदेशसाहस्री नवमोऽध्यायः

जनिमज् ज्ञानविज्ञेयं स्वप्नज्ञानवदिष्यते ।
नित्यं निर्विषयं ज्ञानं तस्माद् द्वैतं न विद्यते ॥७ ॥

शंकराचार्य कृतिः उपदेशसाहस्री एकादशोऽध्यायः

मनोवृत्तं मनश्चैव स्वप्नवज् जाग्रतीक्षितुः ।
संप्रसादे द्वयासत्त्वाच् चिन्मात्रः सर्वगोऽद्वयः ॥४ ॥

स्वप्नः सत्यो यथा ऽऽबोधाद् देहात्मत्वं तथैव च ।
प्रत्यक्षादेः प्रमाणत्वं जाग्रत् स्यादा ऽऽत्मवेदनात् ॥५ ॥

या माहाराजनाद्यास्ता वासनाः स्वप्नदर्शिभिः ।
अनुभूयन्त एवेह ततोऽन्यः केवलो दृषिः ॥१० ॥

कोशादिव विनिष्कृष्टः कार्यकारणवर्जितः ।
यथासिर्दृश्यते स्वप्ने तद्वद् बोद्धा स्वयंप्रभः ॥११ ॥

महाराजादयो लोका मयि यद्वत् प्रकल्पिताः ।
स्वप्ने तद्वद् द्वयं विद्याद् रूपं वासनया सह ॥१३ ॥

शंकराचार्य कृतिः उपदेशसाहस्त्री त्रयोदशोऽध्यायः

मानस्यस्तद्वदन्यस्य दृश्यन्ते स्वप्नवृत्तयः ।
द्रष्टुर्दृष्टिस्ततो नित्या शुद्धानन्ता च केवला ॥८ ॥

शंकराचार्य कृतिः उपदेशसाहस्त्री चतुर्दशोऽध्यायः
स्वपनस्म्रतिप्रकरणम्

स्वप्नस्मृत्योर्घटादेर्हि रूपाभासः प्रदृश्यते ।
पुरा नूनं तदाकारा धीर्दृष्टेत्यनुमीयते ॥१ ॥

भिक्षामश्नन् यथा स्वप्ने दृष्टो देहो न स स्वयम्।
जाग्रद्दृश्यात् तथा देहाद् द्रष्टृत्वादन्य एव सः ॥२॥

धीरेवार्थस्वरूपा हि पुंसा दृष्टा पुरापि च।
न चेत् स्वप्ने कथं पश्येत् स्मरतो वाकृतिः कुतः ॥५॥

करणं कर्म कर्ता च क्रिया स्वप्ने फलं च धीः।
जाग्रत्येवं यतो दृष्टा द्रष्टा तस्मात् ततोऽन्यथा ॥८॥

दृष्टिः श्रुतिर्मतिर्ज्ञातिः स्वप्ने दृष्टा जनैः सदा।
तासामात्मस्वरूपत्वादतः प्रत्यक्षतात्मनः ॥२६॥

शंकराचार्य कृतिः उपदेशसाहस्री षोडशोऽध्यायः

जाग्रत्स्वप्नौ तयोर्बीजं सुषुप्ताख्यं तमोमयम्।
अन्योन्यस्मिन्नसत्त्वाच् च नास्तीत्येतत् त्रयं त्यजेत् ॥१८॥

विकल्पोद्भवतोऽसत्त्वं स्वप्नदृश्यवदिष्यताम् ।
द्वैतस्य प्रागसत्त्वाच्च सदसत्त्वादिकल्पनात् ॥३४ ॥

शंकराचार्य कृतिः उपदेशसाहस्री सप्तदशोऽध्यायः

येन वेत्ति स वेदः स्यात् स्वप्ने सर्वं तु मायया ।
येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते ॥१४ ॥

येन स्वप्नगतो व सा वाग् घ्राणं तथैव च ।
रसनस्पर्शने चैव मनश्चान्यत् तथेन्द्रियम् ॥१५ ॥

स्वप्ने यद्वत् प्रबोधे च बहिश्चान्तस्तथैव च ।
आलेख्याध्ययने यद्वत् तदन्योन्यधियोद्भवम् ॥१८ ॥

दृष्टं जागरितं विद्यात् स्मृतं स्वप्नं तदेव तु ।
सुषुप्तं तद्भावं च स्वमात्मानं परं पदम् ॥२४ ॥

सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः ।
स्वात्मबोधप्रदग्धं स्याद् बीजं दग्धं यथाभवम् ॥२५ ॥

बीजं चैकं यथा भिन्नं प्राणस्वप्नादिभिस्थता ।
स्वप्नजाग्रच्छरीषु तद्वच् चात्मा जलेन्दुवत् ॥२७ ॥

मायाहस्तिनमारुह्य मायाव्येको यथा व्रजेत् ।
आगच्छंस्तद्वदेवात्मा प्राणस्वप्नादिगोऽचलः ॥२८ ॥

शंकराचार्य कृतिः उपदेशसाहस्री अष्टादशोऽध्यायः

नैवं स्वप्ने पृथक्सिद्धेः प्रत्ययस्य दृशेस्तथा ।
रथादेस्तत्र शून्यत्वात् प्रत्ययस्यात्मना ग्रहः ॥११७ ॥

स्वप्ने दुःख्यहमद्यासं दाहच्छेदादिहेतुतः ।
तत्कालभाविभिर्वाक्यैर्न बाधः क्रियते यदि ॥१८४ ॥

शंकराचार्य कृतिः उपदेशसाहस्त्री विंशः अध्यायः

अतो रूपादिसंस्काराद्यशुद्धिसंबन्धाभावान् न परस्मादात्मनो विलक्षणस्त्वमिति
प्रत्यक्षादिविरोधाभावाद् युं पर एवात्माहमिति प्रतिपत्तुं भभ
तदात्मानमेवावेद् अहं ब्रह्मास्मि एकधैवानुम्द्रष्टव्यं
अहमेवाधस्तात् आत्मैवाधस्तात् सर्वमात्मानं पश्येत्
यत्र त्वस्य सर्वमात्मैव इदं सर्वं यदयमात्मा स एषो
कलः अनन्तरमबाह्यं सबाह्याभ्यन्तरो ह्यजः
ब्रह्मैवेदं एतया द्वारा प्रापद्यत प्रज्ञानस्य
नामधेयानि सत्यं ज्ञानमनन्तं ब्रह्म तस्माद् वा
तत् सृष्ट्वा तदेवानुप्रविशत् एको देवः सर्वभूतेषु गुढः
अशरीरं शरीरेषु न जायते म्रियते स्वप्नान्तं
जागरितान्तं स म आत्मेति विद्यात् यस्तु सर्वाणि भूतानि
तदेजति तन् नैजति वेनस्तत् पश्यन् तदेवाग्निः

अहं मनुरभवं सूर्यश्च  अन्तः प्रविष्टः शास्ता जनानां
सदेव सोम्य  तत् सत्यं स आत्मा तत् त्वमसि  इत्यादिश्रुतिभ्यः ॥
३७ ॥

सुखमासीनं ब्राह्मणं ब्रह्मनिष्टं कश्चिद् ब्रह्मचारी जन्ममरणलक्षणात् संसारान् निर्विण्णो मुमुक्षुर्विधिवदुपसन्नः पप्रच्छ भभ भगवन् कथमहं संसारान् मोक्षिष्ये । शरीरेन्द्रियविषयवेदनावान् जागरिते दुःखमनुभवामि तथा स्वप्नेऽनुभवामि पुनः पुनः सुषुप्तिप्रतिपत्त्या विश्रम्य । किमयमेव मम स्वभावः किं वान्यस्वभावस्य सतो नैमित्तिक इति । यदि स्वभावो न मे मोक्षाशा स्वभावस्यावर्जनीयत्वात् । अथ नैमित्तिको निमित्तपरिहारे स्यान् मोक्षोपपत्तिः ॥ ४५ ॥

गुरुरुवाच भभ अविद्या निमित्तं विद्या तस्या निवर्तिका अविद्यायां निवर्तायां तन्निमित्ताभावान् मोक्ष्यसे जन्ममरणलक्षणात् संसारात् स्वप्नजाग्रद्दुःखं च नानुभविष्यसीति ॥ ४८ ॥

नैवमग्नेरुष्णप्रकाशवत् तव चितिमत्त्वस्य विवक्षितत्वात्। दर्शितश्च दृष्टान्तः प्रकाशयोरिवेति। तत्रैवं सति स्वबुद्ध्यारूढमेव सर्वमुपलभसेऽग्न्युष्णप्रकाशतुल्येन कूटस्थनित्यचितन्यस्वरूपेण। यदि चैवमात्मनः सर्वदा निर्विषेशत्वमभ्युपगच्छसि। किमित्यूचिवान् सुषुप्ते विश्रम्य विश्रम्य जाग्रत्स्वप्नयोर्दुःखमनुभवामि। किमयमेव मम स्वभावः किं वा नैमित्तिक इति च। किमसौ व्यामोहऽपगतः किं वा न॥ ७३॥

यदि भगवन् सुषुप्त इव मम विक्रिया नास्ति कथं स्वप्नजागरिते॥ ८६॥

तं गुरुरुवाच भभ आगन्तुके त्वेते न तवात्मभूते। यदि तवात्मभूते चैतन्यस्वरूपवत् स्वतःसिद्धे सन्तते एव स्याताम्। किं च स्वप्नजागरिते न तवात्मभूते व्यभिचारित्वात् वस्त्रादिवत्। न हि यस्य यत् स्वरूपं तत् तद्व्यभिचारि दृष्टं। स्वप्नजागरिते तु चैतन्यमात्रत्वाद् व्यभिचरतः। सुषुप्ते चेत् स्वरूपं व्यभिचरेत् तन् नष्टं नास्तीति वा बाध्यमेव स्यातागन्तुकानां अतद्धर्माणामुभयात्मकत्वदर्शनात् यथा धनवस्त्रादीनां नाशो दृष्टः स्वप्नभ्रान्तिलब्धानां त्वभावो दृष्टः॥ ८९॥

नन्वेवं भगवन् चैतन्यस्वरूपमप्यागन्तुकं प्राप्तं स्वप्नजागरितयोरिव सुषुप्तेऽनुपलब्धेः। अचैतन्यस्वरूपो वा स्यामहम्॥ ९०॥

यद्य् एवं भगवन् कूटस्थनित्यावगतिरात्मज्योतिःस्वरूपैव स्वयंसिद्धा आत्मनि प्रमाणनिरपेक्षत्वात् ततोऽन्यदचेतनं संहत्यकारित्वात् परार्थम्। येन च सुखदुःखमोहप्रत्ययावगतिरूपेण पारार्थ्यं तेनैव स्वरूपेणानात्मनोऽस्तित्वं नान्येन रूपान्तरेण अतो नास्तित्वमेव परमार्थतः। यथा हि लोके रज्जुसर्पमरीच्युदकादीनां तदवगतिव्यतिरेकेणाभावो युः। एवमेव भगवनवगतेरात्मज्योतिषो नैरन्तर्यभावात् कूटस्थनित्यता अद्वैतभावश्च सर्वप्रत्ययभेदेष्वव्यभिचारात्। प्रत्ययभेदास्त्ववगतिं व्यभिचरन्ति। यथा स्वप्ने नीलपीताद्याकारभेदरूपाः प्रत्ययास्त्ववगतिं व्यभिचरन्ति। यथा स्वप्ने नीलपीताद्याकारभेदरूपाः प्रत्ययास्तदवगतिं व्यभिचरन्तः परमार्थतो न सन्तीत्युच्यन्ते एवं जाग्रत्यपि नीलपीतादिप्रत्ययभेदास्तामेवावगतिं व्यभिचरन्तोऽसत्यरूपा भवितूमर्हन्ति। तस्याश्चावगतेरन्योऽवगन्ता नास्तीति न स्वेन स्वरूपेण स्वयमुपादातुं हातुं वा शक्यते अन्यस्य चाभावात्॥ १०९॥

तथैवेति। एषाविद्या यन्निमित्तः संसारो जाग्रत्स्वप्नलक्षणः। तस्या अविद्याया विद्या निवर्तिका। इत्येवं त्वमभयं प्राप्तोऽसि। नान्तःपरं जाग्रत्स्वप्नदुःखमनुभविष्यसि संसाऽद्दुःखान् मुोऽसीति॥ ११० ॥

शंकराचार्य कृतिः वाक्यवृत्तिः

स्वप्नजागरिते सुप्तिं भावाभावौ धियां तथा।
यो वेत्त्यविक्रियः साक्षात्सोऽहमित्यवधारय॥ २२ ॥

शंकराचार्य कृतिः सर्ववेदान्तसिद्धान्तसारसंग्रहः

निद्रागाढतमोवृतः किल जनः स्वप्ने भुजङ्गादिना
ग्रस्तं स्वं समवेक्ष्य यत्प्रलपति त्रासाद्धतोऽस्मीत्यलम्।
आप्तेन प्रतिबोधितः करतलेनाताड्य पृष्टः स्वयं
किंचिन्नेति वदत्यमुष्य वचनं स्यात्तत्किमर्थं वद॥ २६४ ॥

स्वप्ने जागरकालीनवासनापरिकल्पितान्।

तैजसो विषयान्भुे सूक्ष्मार्थान्सूक्ष्मवृत्तिभिः ॥ ३८८ ॥

येनानुभूयते सर्वं जाग्रत्स्वप्नसुषुप्तिषु ।
विज्ञातारमिमं को नु कथं वेदितुमर्हति ॥
सर्वस्य दाहको वह्निर्वह्नेर्नान्योऽस्ति दाहकः ।
यथा तथात्मनो ज्ञातुर्ज्ञाता कोऽपि न दृश्यते ॥ ५८९ ॥

यत्रात्मनोऽकामयितृत्वबुद्धिः
स्वप्नानपेक्षापि च तत्सुषुप्तम् ।
इत्यात्म सद्भाव उदीर्यतेऽत्र
श्रुत्यापि तस्माच्छ्रुतिरत्र मानम् ॥ ५९५ ॥

अकामयितृता स्वप्नादर्शनं घटते कथम् ।
अविद्यमानस्य तत आत्मास्तित्वं प्रतीयते ॥ ५९६ ॥

। शाश्वतलक्षणम् ।

अनुस्यूतात्मनः सत्ता जाग्रत्स्वप्नसुषुप्तिषु ।
अहमस्मीत्यतो नित्यो भवत्यात्मायमव्ययः ॥
सर्वदाप्यासमित्येवाभिन्नप्रत्यय ईक्ष्यते ।
कदापि नासमित्यस्मादात्मनो नित्यता मता ॥ ६०० ॥

यः स्वप्नमद्राक्षमहं सुखं योऽभ
स्वाप्सं स एवास्म्यथ जागरूकः ।
इत्येवमच्छिन्नतयानुभूयते
सत्तात्मनो नास्ति हि संशयोऽत्र ॥ ६०३ ॥

अविद्याकार्यकरणसंघातेषु पुरोदितः ।
आत्मा जाग्रत्यपि स्वप्ने न भवत्येष गोचरः ॥ ६४५ ॥

यदास्त्युपाधिस्तदभिन्न आत्मा
तदा सजातीय इवावभाति ।

स्वप्नार्थतस्तस्य मृषात्मकत्वाभ
त्तदप्रतीतौ स्वयमेष आत्मा ।
ब्रह्मैक्यतामेति पृथङ् न भाति
ततः सजातीयकृतो न भेदः ॥ ६७८ ॥

तयोरुपाधिश्च विशिष्टता च
तद्धर्मभाक्त्वं च विलक्षणत्वम् ।
भ्रान्त्या कृतं सर्वमिदं मृषैव
स्वप्नार्थवज्जाग्रति नैव सत्यम् ॥ ७४८ ॥

न स्वप्नजागरणयोरुभयोर्विशेषः
संदृश्यते क्वचिदपि भ्रमजैर्विकल्पैः ।
यद्दृष्टदर्शनमुखैरत एव मिथ्या
स्वप्नो यथा ननु तथैव हि जागरोऽपि ॥ ७५० ॥

अविद्याकार्यतस्तुल्यौ द्वावपि स्वप्नजागरौ ।

दृष्टदर्शनदृष्यादिकल्पनोभयतः समा ॥ ७५१ ॥

विदित्वा सच्चिदानन्दे मयि दृश्य परम्पराम् ।
नामरूपपरित्यागो जाग्रत्स्वप्नः समीर्यते ॥ ९३४ ॥

मूलाज्ञानविनाशेन कारणाभासचेष्टितैः ।
बन्धो न मेऽतिस्वल्पोऽपि स्वप्नजाग्रदितीर्यते ॥ ९३६ ॥

कारणाज्ञाननाशाद्यद्द्रष्टृदर्शनदृश्यता ।
न कार्यमस्ति तज्ज्ञानं स्वप्नस्वप्नः समीर्यते ॥ ९३७ ॥

अतिसूक्ष्मविमर्शेन स्वधीवृत्तिरचञ्चला ।
विलीयते यदा बोधे स्वप्नसुप्तिरितीर्यते ॥ ९३८ ॥

वृत्तौ चिरानुभूतान्तरानन्दारुभवस्थितौ ।
समात्मतां यो यात्येष सुप्तिस्वप्न इतीर्यते ॥ ९४० ॥

शयन्ति स्वप्नवोकं तुर्यभूमिसुयोगतः ।
पञ्चमीभ भूमिमारुह्य सुषुप्तिपदनामिकाम् ॥ ९४५ ॥

स्तोत्राणि सूक्तानि च        देवी माहात्म्यम् एवं दुर्गासप्तशती        द्वादशोऽध्यायः

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १६ ॥

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ।
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥

स्तोत्राणि सूक्तानि च        दुर्गासहस्रनामस्तोत्रम        दुर्गासहस्रनामस्तोत्रम

वैश्वानरी महाशूला देवसेना भवप्रिया ।

महारात्री परानन्दा शची दुःस्वप्ननाशिनी ॥ ५३ ॥

स्तोत्राणि सूक्तानि च      जगन्नाथस्तोत्रम      जगन्नाथ प्रार्थनाः

भानामभयप्रदो यदि भवेत्किंतद्विचित्रं प्रभो
कीटोऽपि स्वजनस्य रक्षणविधावेकान्त मुद्वेजितः ।
ये युष्मच्चरणारविन्दविमुखा स्वप्नेऽपि नालोचका
स्तेषामुद्धरणक्षमो यदि भवेत् कारुण्य सिन्धस्तदा ॥ २ ॥

स्तोत्राणि सूक्तानि च      जागृहि जागृहि

ऐश्वर्यं स्वप्न संकाशं यौवनं कुसुमोपमम् ।
क्षणिकं जलमायुष्च तस्मात् जागृहि जागृहि ॥ ४ ॥

स्तोत्राणि सूक्तानि च      शिवसहस्रनाम स्तोत्रम्

नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ।
दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ॥ ८४ ॥

इतर ग्रन्थाः भर्तृहरिकृत वैराग्यशतकम्

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकवाटपाटनपटुर्धर्मोऽपि नोपार्जितः।
नारी पीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम्॥ ४५॥

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषापि समाहितेन मनसा पित्रोर्न संपादिता।
आलोलायतलोचनाः प्रियतमाः स्वप्नेऽपि नालिङ्गिताः
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेर्यते॥ ४७॥

इतर ग्रन्थाः उज्जयनी काव्यम् प्रथमोऽध्यायः

स्वप्नावलीमधुघटैर्ऋतुराजयात्रा
सत्कारभोजनमहोत्सव आविरस्ति।
एतत्परं विपरिणाममनोहरास्ते
ग्रीष्मर्तुवासरगणाः परिवर्धयन्ति॥ ३१॥

इतर ग्रन्थाः उज्जयनी काव्यम् तृतीयोऽध्यायः

गतेऽर्धरात्रेऽङ्कणगायकास्ते
सुप्ताश्च गानक्ळमतः पितापि ।
प्रभाततारेण सहोत्थितुं तत्
क्षोणीतले स्वप्ननिमज्जितोऽभूत् ॥ ४६ ॥

इतर ग्रन्थाः उज्जयनी काव्यम् चतुर्थोऽध्यायः

कोऽस्मिन् रथे रघुरिहोदितपूर्वबोधाद्
वंशीयगीतिनिवहः प्रविजागरूकः ।
स्वप्नायितं सकलमेतदितीव किं वा
सर्गव्यथाकिरणकैरभिव्यज्यते वा ॥ १६ ॥

इतर ग्रन्थाः उज्जयनी काव्यम् पञ्चमोऽध्यायः

समुदेति कस्मात् कुतो वानुमात्रं वि -
वर्धमानो डमरुताळः

श्रीरङ्गके नटननिर्मग्ननटराज -

करगतमहाडमरुताळः ।

नासौ दिवास्वप्नमथवा मतिभ्रमो

हृदयनयनेक्षितं सत्यम् ।

आकाशभूम्यौ दिवारात्रकारका -

वादित्यचन्द्रौ च सकलभुवनान्यपि

संपूरयन्महाकाळनटनं तदा

जागर्ति पथिकस्य पुरतः ।

नयननळिनं परमहर्षेण पूरितम् ।

नवसर्गताळसुस्पन्दितमिदानीभ

डमरुरपरो भवति हृदयम् ॥ ७ ॥

तीव्रप्रणयोज्ज्वलात्मनां मेळन -

सत्रं हि हैमवतभूमिः ।

हेमकूटाचलशृङ्गात् सकौतुक -

मायान्ति भूमौ सुरास्ते ।

रङ्गे तु नामस्खलितापराधतो

गुरुशापहेतोः कदाचित्

उर्वशी चागमत् स्वप्नतुल्या
अस्वर्गजां सुधामास्वादयच्च या
विक्रमनृपालहृदयानुरागः।
अप्सरा अप्यनुभुघे स्म मर्त्यस्य
सौहार्दशुद्धदौर्बल्यान्यहो तदा ॥ १३ ॥

इतर ग्रन्थाः उज्जयनी काव्यम् षष्ठोऽध्यायः

मूर्तीभवत्प्राननैजपुण्यां
लज्जावनम्रं समुपस्थितां ताम्।
स्वप्नेषु जाग्रत्स्वपि चार्धबोधे -
ष्वयं सदा पश्यति चत्वरस्थः॥ ५७ ॥

इतर ग्रन्थाः उज्जयनी काव्यम् अष्टमोऽध्यायः

मदीयसत्यान्यत एव मन्ये
मम प्रियस्वप्नशतानि चासौ।
कविः समाविष्कुरुते यथा मे
हृदि प्रविष्टोऽतिनिगूढदेहः॥ ११ ॥

स्वप्नद्रुमः पल्लवितो बभूव
श्रीविक्रमस्येति तु किंवदन्ती ।
पाषाणभित्तेरपि चास्ति कर्णो
रहस्यवेदीह समीरणोऽपि ॥ ६१ ॥

इतर ग्रन्थाः उज्जयनी काव्यम् नवमोऽध्यायः

कदाचित् कविराह ह्यः स्वप्ने त्वां दृष्टवानहम् ।
कण्वपुत्रीवेषभूषाधारिणीभ सुमनोहरीम् ॥ ६४ ॥

स्वप्नो यथार्थतामाप ह्यनन्तरमहामहे ।
शाकुन्तळप्रयोगोऽभूद् राजाज्ञानुसृतं तदा ॥ ६५ ॥

इतर ग्रन्थाः उज्जयनी काव्यम् एकादशोऽध्यायः

अकाल एवात्र किमागतस्त्वं -

स्वयं तदावर्तनलोलुपोऽभूत्।
विभ्रामकस्वप्न इवेह कस्मात्
पूर्वेद्युरागच्छमहो निशायाम्॥ ३॥

स्वप्नो न कश्चिद्दलितो न चास्ति
याम्येव यान्त्या निशया समेतः।
नावश्यकस्तन्नृपदत्तदोळा-
भृत्यावलीबद्धपरिच्छदो मे॥ ७०॥